# Impact of
# Language, Literature & Education




**Editors**

**Dr.Ratnakar D B**

**Dr.K A Emmanuel, Dr.P Paul Divakar**

# CONTENTS

Chapter: 10

भारतीय कालगणनाक्रमः 43

- *Dr. Leenachandra K*

Chapter: 11

**साहित्य और सामाजिक यथार्थ : एक अनुशीलन** 47

- *Dr. R.N.V.S Raja Rao, Dr. K.V.S.P.B. Acharya, B. Vinayakudu*

Chapter: 12

**हिन्दी साहित्य को महिला लेखिकाओं का योगदान** 53

(उपन्यासों के विशेष संदर्भ में)

- *K. Sailaja*

Chapter: 13

महाभारतेतिहासे विद्यमान महिलानां साधिकारता 58

- *Dr. V. Pavani*

Chapter: 14

कालिदास साहित्ये भारतीय संस्कृतिः 62

- *Dr. A.V.N.G.Hanumath Prasad*

Chapter: 15

**मैत्रेयी पुष्पा के उपन्यासों में स्त्री विमर्श** 66

- मद्दाला जयलक्ष्मी

Chapter: 16

**తెలుగులో గిరిజన నాటకాలు-వస్తు, రూప వివేచన** 70

- **డా॥పాన్‌గోత్ భగ్గు**

Chapter: 17

**తెలుగు వచన కవిత్వం - బి.సి వాద స్పృహ** 79

- రాఘవేందర్ కె

Chapter: 18

ఎండ్లూరి సుధాకర్-కథా దృక్పథం 84

- **డా॥ నాగరాజు అసిలేటి,**

Chapter: 19

**ఎన్నెల నవ్వు నవల - యానాది స్త్రీ జీవిత చిత్రణ** 87

- **డా॥ శ్రీను కేతావత్**

 | ISBN 978-81-944859-8-8

Chapter: 13

# महाभारतेतिहासे विद्यमान महिलानां साधिकारता

Dr. V. Pavani

अनन्ते भारतवाङ्मये महाभारततुल्यः द्वितीयः ग्रन्थः न विद्यते। बहवः कथाः नित्यजीवनोपयोगिन्यः धर्मसंशयनिवर्तकाश्च असंख्याकाः भारते दृश्यन्ते। अत एव **अनाश्रित्य एतदाख्यानं कथा भुवि न विद्यते।**

सृष्टेः आदौ परमात्मना एव स्त्रीपुरुषभेदः कल्पितः। परमात्मा स्व आत्मानं प्रकृतिः, पुरुषः इति द्विधा सृष्टेः आदौ ... विबभाज। पुरुषस्तु प्रधानम्। प्रकृतिः स्त्री। प्रधानेन शोभ्यमानायाः प्रकृतेः एव सृष्टेः उत्पत्तिः इति सर्वैः अङ्गीकृतः विषयः। महाभारते स्त्रीणां कृते नैके अधिकाराः कल्पिताः। स्त्रीषु एवं वृत्तिः कार्या, स्त्रीभिः एवं वर्तितव्यम्, स्त्रीणाम् इमे अधिकाराः इति निरूपयितुं बहूनां स्त्रीणां चरितम् उदाहृतम्।

वस्तुतः श्रुतिस्मृतिपुराणेतिहासादिषु स्त्रीणां कृते प्राधान्यं न दत्तमिति दुरूहः सर्वत्र प्रचलति। परं अद्यतनीयाः स्त्रियः स्वस्याधिकाराणां कृते तासां वाक्कौशलं प्रदर्शयन्ति, ते अधिकाराः सर्वाः महर्षिभिः इतिहासेषु उपनिबद्धिताः। उदाहरणार्थं पुरुषेण साकं विद्यार्जनम्, स्वाभिप्रायप्रकटनम्, जीवनाधिकारः, जीविताधिकारः इत्यादयः महिलानां कृते2पि कल्पनीयाः इति स्वैरेण उद्घोषयन्ति।

**विद्याधिकारः** - एतादृशाः अधिकाराः महाभारतकालादेव स्त्रीणां कृते दत्ताः दृश्यन्ते। महाभारतकाले वेदाध्ययनाधिकारः अपि कल्पितः। शान्तिपर्वणि सुलभाजनकसंवादे सुलभा नाम सन्यासिनी जनकं परीक्षते। अश्वमेधपर्वणि ब्रह्मणीब्राह्मणसंवादपर्वनाम्ना विस्तरेण ब्रह्मविद्याप्रसङ्गः निरूपितः। तत्र भर्ता ब्राह्मणः स्वयं भार्यां ब्रह्मविद्याम् अध्यापयति। अतः स्त्रीणां विषये महाभारतकाले स्मृतिकालादपि स्वेच्छा वर्तते इति

निश्चयेन वक्तुं शक्यते। ज्योति बाई पूले इति कश्चन पण्डितः स्वभार्यायाः कृते विद्यां बोधितवान्। सापि विद्यायाः रुचिमवाप्य अन्यासां स्त्रीणां कृते विद्या बोधनार्थम् प्रप्रथमतया उपकल्पयति। सावित्रीबाई पूले प्रप्रथम महिला उपाध्यायिनी इति अधुनापि कीर्त्यन्ते। एतादृश विद्याधिकारः महभारतकाले अवर्तत इति निश्चयेन वक्तुं शक्यते।

यज्ञाधिकारः – स्त्रियः जातकर्मादिकाः संस्काराः अमन्त्रकाः एव धर्मशास्त्रेषु विहिताः। विवाहः एक एव मन्त्रपूर्वकः विहितः। पुरुषस्य विवाहानन्तरमेव यज्ञकर्मसु अधिकारः सिध्यति। आदिपर्वणि दुष्यन्तोपाख्याने शकुन्तला वाक्येषु एवं स्पष्टमुक्तम्। अविवाहितस्य पुरुषस्य यज्ञाधिकारः उत्तमलोकप्राप्तिश्च न भवतीति ज्ञायते।

**अर्धं भार्या मनुष्यस्य भार्या श्रेष्ठतमः सखा।**
**भार्यामूलं त्रिवर्गस्य भार्या मित्रं मरिष्यतः।।**
**भार्यावन्तः क्रियावन्तः स भार्या गृहमेधिनः।**
**भार्यावन्तः प्रमोदन्ते भार्यावन्तः श्रियान्विता।।** म.भा.आदि.68अ.39,40 श्लो

एवं भार्यायाः यज्ञाधिकारम् परिकल्प्य स्त्रीणां स्थानं ज्ञापयन्ति। अद्यतन समाजे स्त्रियान् केवलं भोग्यवस्तुरूपेण दर्शयन्ति। स्व विज्ञतां विहाय नैकानि अकृत्यानि अपि कुर्वन्ति। तेषां कृते एतादृश उपदेशानि अवश्यं बोधनीयानि। बाल्यादारभ्य एतादृश भावनां तेषां मनसि वयं न स्थापयेम तर्हि समाजस्य अभ्युन्नतिः न भवेयुः। यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः इत्यार्योक्त्या अस्माकं भारतदेशस्य उन्नतिः यावत्प्रपञ्चे2पि विराजते। अस्माकं भारतदेशस्य सदाचारादिकान् सर्वानपि सर्वे मनसि निधाय प्रवर्तेरन्। तदा एव उन्नतिः भविष्यति। अन्येषां मार्गदर्शनं भवति अस्माकं भारतदेशः।

**स्वयंवराधिकारः** – महाभारते स्वयं वरं वृताः सावित्री, द्रौपदी, शकुन्तला, दमयन्ती तथा देवयानी इत्यादयः स्त्रियः दृश्यन्ते। क्षत्रियस्त्रीणामेव एष सम्प्रदायः वर्तते इत्यपि दृश्यते। परं अद्यतनीयाः युवतयः स्वयं वरं वर्तुं स्वमातापितृणामाज्ञामपि धिक्कारयन्ति। परं महाभारते दुष्यन्तेन चोदितापि शकुन्तला तदानीं स्व पितरं कण्वं प्रष्टुं प्रेरयति। तत्र दुष्यन्तः शकुन्तलां क्षत्रिय धर्मं बोधयति। तदा एव शकुन्तला तं विवाहार्थमङ्गीकृतवती। एष विषयः सर्वैः चिन्तनीयः। शकुन्तला स्वयं विवाहं कृतवत्यपि यदा दुष्यन्तं तां धिक्करोति तदा धैर्येण सभायां धर्मं प्रबोधयति। परं इदानीं यथेच्छं विवाहादिकान् याः कुर्वन्ति ताः धैर्यं विहाय स्व प्राणानपि त्यक्तुम् उद्युक्ताः भवन्ति। एष सम्प्रदायः वयमेव निवारणीयः।

**मन्त्रालोचनाधिकारः** – स्त्रीणां मन्त्रालोचने2पि अधिकारः महाभारते दृश्यते। सत्यवती शन्तनोरनन्तरं कुरुवंशं स्थापयितुं भीष्मेण मन्त्रालोचनं कृतवती। शोकपूर्णा अपि सा धर्ममेव अनुसृतवती। वंशाभिवृद्धिमाकाङ्क्षयति।

| ISBN 978-81-944859

सत्यवत्याः अनन्तरं कुन्ती बहुषु सन्दर्भेषु बहुधा मन्त्रालोचनं कृतवती। कृष्णः यदा द्यौत्यार्थं हस्तिपुरमागम तदा युधिष्ठिर कथञ्चित् सन्धिं कर्तुमिच्छति कृष्णोपि द्यौत्यात् प्राक् प्रथमं विदुरगृहं जगाम। तत्र कुन्ती नवीभूतदुःखा कृष्णं पाण्डवैः अनुभूताः आपदः ज्ञापयामास। द्रौपदीपरिभवमधिकृत्य उक्तवती। द्रौपद्याः प्रियतरः न मे सुतेषु कश्चिदप्यस्ति इति वारं वारं द्रौपद्याः पराभवमेव चिन्तयति। एतादृश चिन्तनम् अद्यतन कुटुम्बव्यवस्थायां कुत्रापि न दृश्यते। यतोहि आङ्गभाषायां न्यूक्लियर् फ्यामिली इत्युच्यन्ते अद्यतन कुटुम्बव्यवस्थाम्। श्वश्रूः स्नुषां पुत्री रूपेण नाङ्गीकुर्वन्ति, स्नुषाऽपि श्वश्रूं मातृ रूपेण न पूजयति। एतद्द्वयमपि यदि सिध्येते तर्हि अन्तर् राष्ट्र जगडादिरूपेण मनस्पर्धाः नागच्छन्ति। अस्माकं कलाशालायाः मा अनसूयादेव्यै एका सूक्तिः असूचयत् – కూతురిని కోడలిని ఒకటిగా చూడగలగడమే నిజమైన ఔన్నత్యం इति यदि एतादृश चिन्तनं वयं कुर्मः अन्तर्युद्धाः कुटुम्बेषु न भवन्त्येव।

कुन्त्याः अनन्तरं द्रौपदी उत्तमा क्षत्रिया महाभारते दृश्यते। सा स्वयं दुःखं स्त्रिया न सोढव्यम् अनुबभूव। अत्र सा सदा क्षमाम् इच्छता धर्मराजेन विद्यते। सभापर्वणः आरभ्य शान्तिपर्वपर्यन्ते ग्रन्थे द्रौपद्याः मन्त्रालोचननिरूपकाः बहवः सन्दर्भाः दृश्यन्त एव। स्त्री सर्वदा रक्षणीया एव इति महाभारतं सूचयति। यतोहि स्त्री अबला इति कारणात्। अद्यतन समाजे बहवः कीचकाः आविर्भवन्ति। तर्हि द्रौपदीं स्मृत्वा वयमपि धैर्येण आक्रन्दनं विना तान् तर्जयामं तर्हि सुरक्षाः भवाम इति। अत्र एकः चिन्तनीयः अंशः वर्तते यत् – स्त्रियः अपि तादृश अवकाशः वेषधारणरूपेण न देयः इति शोचनीयः। अस्माकं संरक्षणस्य कार्यः वयमेव प्रथमं करणीयः तदा एव आरक्षादीनां साहाय्यं स्वीकरणीयम्। महाभारते द्रौपदीं सभां प्रति यदा प्रातिकामः नेतुमागच्छति तदा धैर्येण धर्मप्रश्नमेकं पृच्छति –

**किं नु पूर्वं पराजैषीरात्मानं मां नु भारत।**
**एतत्ज्ञात्वा त्वमागच्छ ततो मां नय सूतज।।** सभा.60अ.7श्लो

तस्याः धर्मसन्देहः सर्वधर्मज्ञां भीष्मादीनपि संशये पातयामास। अज्ञात्वा यत् किमपि कार्यं कर्तुं प्रभवन्ति अद्यतनीयाः स्त्रियः अनालोच्य स्वयं सङ्कटे पतन्ति। अतः प्रथमम् अस्माकं संरक्षकाः वयमेव इत्यभिप्रायः।

दायविभागः – इदानीं लोके स्त्रीणां कृते दायभागः नास्तीति प्रथा वर्तते। न्यायालयेष्वपि पञ्चाशद्वर्षेभ्यः प्राक् एवं विधा प्रवृत्तिः एव आसीत्। परमस्माकं चारित्रक संघटनां यदि पश्यमश्चेत् तदपि दुरूहः एव इति वक्तुं शक्यते। आङ्ग्लदेश्यानां परिपालने राज्यस्य औरसः पुत्रः नास्ति चेत् तद्राज्यं पाश्चात्यानाम् आक्रमणीयं भवतीति शासनं कृतं डल्हौसी नामक आङ्ग्लेयेन। झान्सी राज्ये स्वातन्त्र्योद्यमसङ्ग्रामः एतदर्थं बुन्देलखण्डप्रान्ते समजनि इति चारित्रकप्रसिद्धम्। तदानीं स्त्रीणाम् अधिकारः परिहृतः परं ततः प्राक् अधिकारः अस्त्येवेति गम्यते।

स्त्रीणां जीवनाधिकारः – स्त्रीणां जीवनविषये वृत्त्यादिषु बहवः अवकाशाः दत्ताः इति महाभारते वर्णिताः। विराटपर्वणि द्रौपदी सैरन्ध्रीवृत्या गौरवयुक्ता सुधेष्णायाः परिवारे अवर्तत। सा दासी न भवति किन्तु गौरवार्हेण वेतनेन राजसभासु आद्रियते। अद्यतनकाले जीवनयात्रे भार्याभर्तृणां धनार्जनमवश्यम् अपेक्ष्यते एव। महिलाः यदा जीवनयात्रार्थं धनार्जनं कर्तुं कार्यालयेषु नैके अवमानाः अनुभवन्ति। तदपि त्यक्तव्यमेव। स्त्रियान् गौरवरूपेण पश्यन्ति महाभारते। शास्त्रोक्तरीत्या वयमपि तदा करणीयः।

**जीविताधिकाराः** गर्भस्थः स्त्रीशिशुः इति मत्वा पितरः विवाहादीनां व्ययप्रयासादिकं बुद्धौ निधाय क्लेशकरमिति हेतोः गर्भे एव हन्ति । तथाविध दुराचारः भारतकाले न दृश्यते स्म। एवं स्त्रीणां जीवनविषये सुरक्षाधिकारः महाभारतकाले अद्यतनकाले इव दत्त एव। यतः वरः कन्यां स्वयं प्रार्थयते स्म याचितायैव कन्या देया इति महाभारते स्पष्टमुक्तम्।

अयाचितानि देयानि सर्वद्रव्याणि भारत।
अन्नं विद्या च कन्या च अनर्थिभ्यो न दीयते।।

अयाचिताय कन्या न देया इत्यर्थं बोधयति। महाभारते सहगमन प्रथा आसीदिति दुरूहः अपि श्रूयते। परं पाण्डोः मरणानन्तरं माद्री स्वमनोवेदनाम् असहमाना एव तम् अनुसृतवती। कुन्ती प्रायशः शतं वर्षाणि जीवितवती। एवम् एतादृशाधिकारान् अस्माकं कृते दत्वा महाभारतं सार्वकालिक, सार्वजनीनोत्तमत्वं प्राप्नोति। स्त्रीणां कृते महाभारते अनुसृताः अधिकाराः सर्वे धर्माचरणार्थमेव इति सिध्यति। एवं स्त्री विषये सर्वे विषया महाभारते वर्तन्ते। बाल्यादारभ्य यावज्जीवं यथा स्त्री सुखं जीवति तद्विधाः अधिकाराः स्त्रियै दत्ताः। अस्वतन्त्रा स्त्री इति वचनं न तस्याः हेपकम्, किन्तु सर्वथा रक्षणीया इत्यंशं सूचयति।

***

Dr. V. Pavani
Lecturer In Sanskrit, Matrusri Oriental College, Jillellamudi, Guntur, AP